# आत्मनेपदिनः धातवः

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | वर्तते | वर्तेते | वर्तन्ते |
| मध्यमपुरुषः | वर्तसे | वर्तेथे | वर्तध्वे |
| उत्तमपुरुषः | वर्ते | वर्तावहे | वर्तामहे |

मोदते, म्रियते, वर्धते, ईहते, शोभते, शङ्कते, खिद्यते, राजते, प्रकाशते, ऊहते, लज्जते, कम्पते, मन्यते पलायते, विद्यते, कामयते, ईक्षते, एधते, भाषते, सेवते, सहते, रमते, लभते

पक्षी आकाशे डयते ।
गृहिणी वातायनात् वीक्षते ।
भक्तः देवं वन्दते ।
याचकः भुङ्क्ते ।
वधूः श्वशुरात् लज्जते ।
नारिकेलवृक्षः वर्धते ।
कण्ठे हारः शोभते ।

एषः दूरवाण्या भाषते ।
आकाशे सूर्यः प्रकाशते ।
चोरः आरक्षकात् पलायते ।
माता पाकशालायाम् आस्ते ।
छात्रः देवं प्रार्थयते ।
कमलं जले जायते ।
एषः बन्धोः वियोगेन खिद्यते ।

पुस्तकम् उत्पीठिकायां विद्यते ।
शिशुः एधते ।
शिष्यः गुरुं सेवते ।
ब्रह्मचारी भिक्षां याचते ।
एषः उद्याने मोदते ।
बालकः मिष्टान्नं कामयते ।
गोविन्दः स्पर्धते ।

लतायां पुष्पे जायेते ।
सत्कार्येण ते सुखं लभन्ते ।
सज्जनाः लोकमङ्गलं कामयन्ते ।

वृक्षाः वायुना कम्पन्ते ।
बालौ क्रीडया मोदेते ।
दरिद्राः कष्टं सहन्ते ।

वृक्षे पुष्पाणि शोभन्ते ।
क्रीडापटवः स्पर्धन्ते ।
ते सम्यक् भाषन्ते ।

युवां कुत्र पलायेथे ?
यूयं चित्राणि वीक्षध्वे ।

त्वं संस्कृतेन भाषसे ।
यूयं संस्कृतोन्नतिं कामयध्वे ।

यूयं कष्टं सहध्वे ।
त्वं शरीरेण वर्धसे ।

अहं देवं वन्दे ।
आवां मिष्टान्नं लभावहे ।
वयं संस्कृतोन्नतिं अपेक्षामहे ।

अहं कष्टं सहे ।
आवां चित्रं दृष्ट्वा मोदावहे ।
वयं कष्टं सहामहे ।

अहं सुखं कामये ।
आवां संस्कृतेन भाषावहे ।
वयं सिंहं दृष्ट्वा पलायामहे ।

Swarup Nov 2010